Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सप्टेंबर-आक्टोबर १९४३

॥ श्रीशः शरणम् ॥

मधुरवाणी.

८ वर्षस्थ] १८६५ शके [११-१२ अङ्कौ:

सम्पादकः
गलगली रामाचार्यः
संस्कृतसाहित्यरत्नम्

सहसम्पादकः
वुर्ली श्रीनिवासाचार्यः
संस्कृतसाहित्यभूषणम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गव्हर्मेंट रजिस्टर्ड

निलगिरी अर्क

सर्दी, पडसे,
डोकेंदुखी, ताप,
अजीर्ण,
कॉलरा, खोकला,
संधीवात,
सूज, ठणका व
हवाशुद्धीसाठीं

वा. किं. ४ आ.
प्रत्येक
थेंब
गुणाचा
प्रभाव
दाखवितो.

NILGIRI ARK.

UE FOR

RELIABLE REMEDY FOR COLD, FEVER, COUGH,
PLAGUE, CHOLERA, RHEUMATIC PAINS ETC.

स्टार कंपनी, बेळगांव.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मधुरवाणी.

सुधानिष्यन्दिन्या मधुरमधुरालापकलया
खलावज्ञाम्च्छाभरमपहरन्ती सुरगिरः ।
मनोज्ञालङ्कारा रसिकजनचेतांसि सहसा
वशीकुर्वाणेयं भुवि मधुरवाणी विजयते ॥

राधाधरमधुस्यन्दमिन्दिन्दाय मधुद्विषे ।
कृष्णापटकुविन्दाय गोविन्दाय नमोऽस्तु नः ॥

मङ्गलम्

(कवयिता-कविराज-श्रीविश्वेश्वरदयालुशर्मा इटावा)

मन्दस्मितस्यन्दिमरन्दबिन्दु-
सन्दोहसौन्दर्यभराभिनन्दि ।
मुग्धं मुकुन्दस्य मुखारविन्दम्
मनोमिलिन्दो विशतात्सुगन्धम् ॥१॥
व्रजाऽन्तरिक्षे समुदेष्यतोऽलम्
कृष्णाननेन्दोश्च निशीथकाले ।
निपीयमाना वसुदेवनेत्र-
चकोरकेणाऽस्तु मुदे सुधाश्रीः ॥२॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीकृष्णस्तवनम्

(कविः-श्रीविश्वेश्वरशर्मा दयालुः)

मन्थानपाशौ करयोर्दधानो गोपाङ्गनानां हृदयानि मथ्नन् ।
संसारसिन्धुं च पदाब्जभाजां गोपालबालो हरतात्स पापान् ॥१॥
दोलाधिशायी फणिराजशय्यः प्रसूनकल्पेन पदाम्बुजेन ।
बभञ्ज यो द्राक्शकटं मुकुन्दः साश्चर्यगोपीसुखदः पुनातु ॥२॥
अङ्के शयानः खलपूतनाया विषाक्तवक्षोरुहपानलोलः ।
प्राणान्पपौ पापिजवोपतापी भूयात्स भव्याय हरिर्भवघ्नः ॥३॥
संपश्य मातः ! क्व नु मन्मुखे मृद् मिथ्यापरीवादपराश्च बालाः ।
इत्यानने दर्शितविश्वविश्वः मात्रे स शौरिर्मुदमातनोतु ॥४॥
हैय्यङ्गवीनं दधि भोक्तुकामो गोपालयुक्तो व्रजगोपगेहे ।
स्कन्धाधिरूढो दधिदिग्धवक्त्रो भूयाद्धितायैव सदा मुकुन्दः ॥५॥
करं कराभ्यां परिगृह्य गोपी—जनैर्यशोदागृहमाशु नीतः ।
सर्वेश्वरोपि श्रितमर्त्यलीलो मृषाऽश्रुनेत्रः स मुदेऽस्तु कृष्णः ॥६॥
वंशीविमुग्धव्रजभामिनीका करे सलीलं धृततुङ्गशैला ।
मूर्निर्मुरारेर्हृदये मदीये भूयाद्विलग्ना भवमोचनाय ॥७॥
गोपाङ्गनानां सुनिमज्जितानाम् संचोर्य वस्त्राणि कदम्बवृक्षे ।
शाखाधिरूढः प्रणयार्थितश्च जीयात्सदा रासविहारलोलः ॥८॥
गोपालकण्ठे निहितैकहस्ता सरोजमन्येन मुदा दधाना ।
द्विजाङ्गनाऽनीतवरान्ततृप्ता मुरारिमूर्तिः पुरतश्चकास्तु ॥९॥
फणासु विन्यस्तपदाम्बुजाता नृत्योत्सुका कालियनामकाहेः ।
निपीतदावाऽमृतवर्षिणी च भूतिर्न गच्छेद्धृदगारतो मे ॥१०॥
क्रीडाभिरायासितदीक्ष्यमाणो गोपालकोत्सङ्गविराजिशीर्षः ।
संवाहनैः सोदरबीजनैश्च संसेव्यमानोऽस्तु मुखाय कृष्णः ॥११॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीशः शरणम्

वत्सरान्ते विज्ञप्तिः

भगवतः करुणाकरस्य कमलारमणस्य अतुलया कृपाकलया, तथा परमोदाराणां केषांचन महात्मनामकम्पयाऽनुकम्पया, सहजसौहार्दरसार्द्रहृदयानां सुरभारतीसमुन्नयनैकसदाग्रहाणां ग्राहकमहोदयानामनवग्रहेणानुग्रहेण च बालाऽपि गुणप्रौढा सरसवचोमाधुर्येण, ललितपदविन्यासेन रसविलासेन स्पृहणीयभावगरिम्णा च रसिकानां यूनां वर्षीयसां न्यासिनामपि चेतोवशीकरणकलानिपुणा अन्वर्थितनामधेया मधुरवाणी कष्टमयमष्टमं वर्षं कथमप्यनेनाङ्केनावसाययतीति यत्सत्यं नितान्तं प्रमोदते नश्चेतः । प्रियपाठकमहोदयाः समरदावानलेन दन्दह्यमाने जगनि; मुज्जृम्भमाणे च सर्वतः सर्वाहुतिग्रहणातुरे विश्वमेधे, अशनवैधुर्येण महानगरेष्वपि प्रतिरथ्यं कृतान्तवदनकुहरातिथीभूतानां पुरुषाणां नारीणां बालानां च कुणपेषु पतत्सु, क्रोशत्सु दरिद्रेषु, पीडितेष्वन्तरितेषु जनेषु, देशविप्लवव्याजेन बद्धमुष्टितां द्रढयत्सु, धनिकेषु लाभैकलोभतया दीनजनालम्भनविप्रलम्भभीकरेषु वणित्सु, महर्घतायाः परां काष्ठामधिगतेषु सकलेषु आहारधान्यादिषु, विरलतामुपगतास्वावश्यकसामग्रीषु, विशेषतो दुर्लभेषु मुद्रणोपयुक्तवस्तुषु, दुर्मिलेषु कागदेषु, वत्सा मधुरवाणी अष्टमवर्षं कथमत्यवाहयदिति वाचका एव विचारयन्तु क्षणं चेतसि आत्मपरिस्थितिसम्भावनया येन आत्मीयभावनयाऽनणीयसी करुणा मधुरवाण्यां समुदयेत् । दुस्सहायामस्यामवस्थायां मधुरवाणी कथं वा प्राणानधारयदित्येव विस्मयस्तिमितं कुर्यादेव सहृदयानां चेतः । विपुलवाचकेषु प्रथितेषु वृद्धेषु समृद्धेष्वपि केषुचन देशभाषापत्रेषु विलयं गतेषु, केषुचित् कार्श्यमावहत्सु बाला निर्धना विरलवाचका च मधुरवाणी करालेऽस्मिन्प्रसङ्गे यज्जीवितमवलम्बितवती तदस्य सर्वस्य श्रेयः सुरवाणीमयजीवितानां मधुरवाणीप्राणायमानानां केषांचन सुगृहीतनामधेयानां महोदाराणां महानुभावानां निर्व्याजं कारुण्यं, मधुरवाण्याः समीहितकार्यकरणप्रावण्यं चावलम्बत इति निवेदयितुं संतुष्यामस्तमाम् । विपद्यस्यां दारुणायामप्रार्थिता अपि स्वयंस्फूर्त्या ये हस्तावलम्बनमदुस्तेषु कथा शब्दस्मरण्या

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कार्तेयं प्रकटनीयमिति न जानीमो वयम् । तेषामुपकारभरं कदाऽप्यविस्मन्ती नतमस्तका प्रसन्नहृदया प्रमोदाश्रुभरा सपुलकाङ्गी च मधुरवाणी सर्वात्मनो सार्वकालिकं परमं श्रेयः समाकाङ्क्षते ।

श्रीमथुभाईकिसनदाससॉलिसिटरविलेपार्ले तथा त्रिशिरः पुरीसं-सा-परिषद्ध्यक्षाः पण्डितहर्यक्षाः सरससाहित्यपाथोनिधिमन्दरायमाणा ए. बी. गोपालाचार्यवर्या (ॲडव्होकेट) महाभागा मधुरवाण्याः सर्वतः श्रेयो भिवृद्धये तनुमनोधनैः सर्वथा स्निह्यन्तीति तेषा मुपकारभरं नितान्तं वहति वत्सा मधुरवाणी ।

मधुरवाण्याश्चेतसि चिरादेव महताऽऽकारेण बाह्याभ्यन्तरसौष्ठवेन च रसिकवाचकमनस्तोषणीयमिति बलवान् विचारः परिवर्तते । परं जीवित-संशयेऽस्मिन् समये पराधीनाऽधना साधनविधुरा बलवदुत्कण्ठिताऽपि किं करोतु वत्सा मधुरवाणी सुसमयप्रतीक्षणमन्तरा ।

अष्टमवत्सर इव नवमोऽपि वत्सरो नवनवामापत्तिं जगतो जनयिष्यति, न पुनः शान्तिपथमाश्रयिष्यतीति सांप्रतिकैर्लक्षणैः स्थूलदृशोऽपि जानीयुः । तदस्मिन् प्रसङ्गे किं वा करणीयमिति नितान्तं चिन्ताक्रान्तस्वान्ता वयं न किमपि ज्ञातुं च प्रभवामः । प्राणपणेनाऽपि मधुरवाणी कथमपि जीवनीयेति द्रढीयान्नः सङ्कल्पः । तत्कृतेऽष्टमे वर्षे अधमर्णतागर्तेऽपातया-मात्मानम् । विविधं कृच्छ्रान्वयमभूम । सुहृदां हितवचनमपि नागणयाम । पुनर्नवमवर्षेऽपि मधुरवाणी महत्कृच्छ्रमनुभूयाऽप्यात्मनो जीवितं धारयन्ती सुरवाणीसेवारूपं तपस्तप्तुं बद्धपरिकरा समुत्सहते । तदस्याः साहसं सुरवाणी प्रणयिनः सर्वे सविस्मयं सादरं सक्रियसहानुभूतिपुरस्सरमभिनन्दयेयुरेवेति बाढं विश्वसिमः । मधुरवाण्याः प्रणयिषु ये लक्ष्मीकृपाकटाक्षगोचरास्ते यावच्छ-क्यमधिकद्रव्यदानेन, मध्यमवर्गीया द्विगुणित मूल्यार्पणेन, अधनास्तु एक-द्वित्रग्राहकसङ्ग्रहेण च मधुरवाणी जीवनीया पोषणीया तोषणीया सर्वात्मना रक्षणीया चेति सौहार्दसहकृताग्रहेण प्रार्थयामः । इयदवधि मधुरवाण्या कृता सेवा यद्यभिमता रुचिता समुचिता, यदि तया करिष्यमाणा परिचर्या सुरवाणीपोषिणी चावश्यकी, यदि संस्कृतवाणीजीवनं प्रचारः प्रसारश्चाभीष्ट-स्तर्हि सपदेव सर्वेच महानुभावा एतल्लेखवाचनक्षण एव मुक्तहस्तं साहाय्यधन प्रेषणेनानुगृण्हन्तु मधुरवाणीम् । एषा मधुरवाण्याः सविनयंप्रार्थना सफला स्यादिति बलीयान्नो विस्रम्भः इति शम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गिरिजायाः प्रतिज्ञा

पं. सौ. क्षमादेवी राव सं. सा. चन्द्रिका मुम्बई.

पूर्वाङ्कतोऽनुवृत्ता

" अस्यान्तः किं तिष्ठतीति " ।

" पेटिकेयं खलु वंशक्रमागता मदीयपुत्रस्य वस्तूनि तदन्तरे दशवर्षाणि रक्षितानि तिष्ठन्ति " इति आकुमारत्वधात्तालबन्धितायाः पेटिकायाः समुद्घाटनमनिच्छन्ती प्रत्यवादीद्गिरिजा ।

अथ सा पुनरचिन्तयद्यदि पेटिका नोद्घाट्येत तर्हि ग्रामाधिपस्य मनसि संशयो जायेतेति। एवं विमृश्याऽनुक्ताऽपि तामुदघाटयत्। बहुदीर्घकालादनन्तरमपावृतायां पेटायां गिरिजा स्मारिनपुत्रशोकाऽऽपादमस्तका चकम्पे । हृदयोद्वेगं तु निरुध्य तनयस्य वस्तून्येकैकशो बहिरुद्धरन्ती सगद्गदं स्वश्वसीत् ।

भद्रे ! अलमलं प्रयासेन । अस्ति मे विश्वासो भवत्याम् " इति ग्रामाधिपः सानुनयमवादीत्। द्वयो रक्षिणोः साहाय्येन सर्वेषु यथापूर्वं निवेशितेषु पेटिकायां च पुनस्तालबद्धायां सा ग्रामपतिं पृष्टवती " भद्र, कथं वराकः कारागार आत्मानममोचयदिति " । सोऽपि जगाद—" प्रतिसप्ताहं स युग्म द्विवारं वासरन्ध्राद्बहिर्मुक्तो रक्षागारस्य समीपे कर्म करोति स्म । तस्य चरितमवेक्ष्य स्वातन्त्र्यमिदं दत्तमासीत् । पुनरिदानीं गृहीतत्रद्धश्चैनं क्षणमपि मोक्ष्यामः । अथ गतरात्रौ द्वारपालकं श्रमसुप्तमालोक्य गृहीतावसरः स बन्दी कारायाः पलायितः । तथाप्यमुं सर्वथोपग्रहीष्यामहे । नात्र कोऽपि संदेहः " । इति श्रुत्वा गिरिजायाश्चेतः करुणया विलीनभूत् । तद्बुध्द्वा ग्रामणीरुवाच ।

" अलमस्मस्थानपानिन्या घृणया । तस्य घोरतमं कृत्यं भवती यद्यवेदिष्यत्तर्हि नैव तस्यादयिष्यत । तेनैव किल हतो भवत्याः पुत्रः" इति ।

" तेनैव हतो मे—" इत्यर्धोक्त एव सा मोहावेगादशनिविद्धेव पेटिकामवलम्ब्य व्यरमत् । शून्यदृष्टिर्धिस्फारितेक्षणा बद्धभीषणभ्रुकुटिः कम्पमानकराङ्घ्रिश्च सा किञ्चित्कालमवतस्थे । चिरात् प्रतीक्षितं कालं स्वयमुपस्थितमुपलभ्य सा व्यचिन्तयत्-अधुना मे प्रतीकारः सुलभः । यदि साङ्घ्रमुलिनिर्देशं तदङ्गणं सूचयेयं तदा नूनमहं कृतकृत्या भवेयमिति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

क्षणान्तरे तु सा ध्यायति " नेदमुचितं मे प्रतिभाति । आश्रितस्य परित्यागेन न भवेदिष्टार्थसिद्धिरिति " । इत्थमाकलय्य कालोचितं वाक्यं सा रक्षिणः प्राह-" आर्यः यद्यसौ जाल्मः स्थानमेतदागच्छेत्तदा निश्चितमेनं भवद्वयः समर्पयेयमिति " । आसीदस्याः प्रतीकारप्रतिज्ञा ग्रामस्थेषु बहोः कालादेव सर्वविदिता । तस्मात्तदीये वचसि ग्रामेशस्य न कापि शङ्का समजनि ।

अथ द्वारमभिगच्छन् सहचरानसौ जगाद " समाप्तमिह कार्यमस्माकम् । सत्वरं गमिष्यामः । नोचेद्रात्रौ तदन्वेषणं दुष्करं भविष्यति " । इत्युक्त्वा वृद्धां नमस्कृत्य च ग्रामणीर्निरगात् । रक्षिणश्च कर्कशैः पादघट्टनैः प्रादोषिकीं प्रशान्ततां भिन्दन्तस्तमनुजग्मुः । सा तु नानाविधविषमसंकल्पजन्यैर्विकारैर्द्विगुणस्पष्टोपलक्ष्यमाणमुखरेखा क्षणमेकमतिष्ठत् । शनैः शनै रक्षिणां तुमुलध्वनिर्मन्दीभवन् भेरीनाद इवाचिराद्दवीयसि विलयमगात् ?। मन्दमन्दं परिहीयमानमेनं तारध्वनिं गिरिजा श्रावं श्रावमात्मानं पर्यवस्थाप्य प्राङ्गणं पुनराजगाम । सामिनिवेशं मुष्टिमाबध्य विषादेन शुष्ककण्ठी निरुद्धहृदयावेगा यावदुत्कम्पगात्री कूपमुपसर्पति तावद्दुर्निवारेण कासप्रकोपेन व्याकुला बभूव। तस्याः कासनशब्दमाकर्ण्य कूपान्तर्निगूढो युवा तामप्राक्षीत् । " अम्ब आगतासि किम् ? अपि निर्गता रक्षिणः ? " । इति ।

तयेति तयोक्ते युवा हर्षेण प्राह, " दयासागरे भद्रं तवास्तु " । इति अथ गिरिजाब्रवीत् " मा स्तुहि, मा स्तुहि हतपुत्रकामेनाम् । यो मे सुतस्य हन्ता त्वं नूनं मे दण्डनीयः " इति ।

श्रुत्वेदं बन्दी बभ्रहत इवाभूत् । स किल सहसा स्मृतवान् यदस्याः पुत्रः स्वेनैव मारित' इति । तेनच भाविनीमात्मनो जलगण्डरूपां विपत्तिं चिन्तयन् क्षणं निर्वचनोऽभूत् । विवक्षमाणस्यापि कण्ठ एव शब्दाश्रिताय संसक्ता बभूवुः। तथाप्यात्मरक्षणाय प्राणान् यतितव्यमिति निश्चित्य तामाचष्ट।

" अयि मातः ! यथा भवत्या प्रतिश्रुतं तथा रज्जुमिदानीमवतारयेति । निरुत्तरां तामुपलभ्य बन्दी पुनरुवाच 'नूनं भद्रे । वाग्दानरक्षणं परमो धर्मः । ननु मातस्त्वयैव रक्षिनोऽस्मि रक्षिइतकैभ्यः " इति ।

तथापि सा न किञ्चिदब्रवीत् । अथ युवा पुनस्तामयाचत " भद्रे निसर्गतः परोपकारशीलासि । मादृशमिदानीं कथं जहासि । अयि ! कल्याणि ! दीनेऽस्मिन् दयां कुरु " इति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तदनु सा प्रत्युवाच, "हे घातकपशो। त्वमेव मम पुत्रहन्तेत्य जानंत्या मन्दभाग्निया मया ते पापिष्ठाय संश्रयो दत्तः" इति। ततो व्याजहार बन्दी—"मयैव हतस्ते पुत्र इति यद्यपि सत्यं तथापि मम जनन्याः प्राणैः शपे यदयं वधो बुद्धिपुरसरं मया न कृतः। श्रूयतां तावद्ब्रवीमि"।

"एकदा किल व्रीहिक्षेत्रे कार्यप्रसक्तयोरावयोर्मध्ये कलहः समुत्थितोऽभूत्। तस्मिन्नतिभूमिं गते द्वावपि प्राणसंशयमारूढौ स्थितौ स्वः। दैवयोगान्न तु द्वेषानुबन्धात्तवात्मजो हन्त मृतोऽभूत्" इति।

अथ सा वद्धभ्रुकुटिः सङ्कोचिताक्षी पापिनो वराकस्य शोच्यतम कथामाकर्ण्य प्रियपुत्रस्य तथाविधं निधनमनुध्यायती भ्रान्तचित्ता परमवेदनया हस्तं हस्तेन निपीडयन्ती मुहूर्तमिव तस्थौ। क्षणाच्च भूतपूर्वो वृत्तान्तविस्तरः तदीयहृदये नवनिर्मितचित्रपटीलेख्यप्रपञ्च इव प्रादुर्बभूव। यथाहि—अविस्मर्यं किल तद्दिनं यस्मिन् वयस्यैर्गृहमानीतः पुत्रस्य शवो यथा नवशोणितप्रदिग्धं तद्वपुर्भयानकमासीत्। यथा क्षणं मूर्च्छयाक्रान्ता स्वयं निपतितवती प्रबुद्धा च यथा समन्तादुपस्थितं बन्धुजनं विलपन्तमालोकयत्। इत्यमनुध्याय, "हन्त पुत्रहन्त्रेऽस्मै स्वयमेवाश्रयो दत्तो मूढया मया। बद्धा चास्मि वचनेन। अहो किंनु कुर्यामिति चिन्तयमाना विकल्पशतविह्वला क्षणद्वय-मापादमस्तकं चकम्पे।

अथ मुहूर्तान्ते वराकः कूपान्तर्निलीनो बन्दी पुनः प्रार्थयामास "हे मातः क्षिप्यतां रज्जुः सत्वरम्। स्थातुमत्र नास्मि क्षमः" इति कथयन्नेव शैत्येन कम्पमानो दन्तान् कटकटापयन् बद्धवाग्विरराम।

यावद्वृद्धाया मानसं भूतपूर्वस्मृतीनां गणैः सहसैवाकुलमभूत्, तावत्कूपाभ्य-न्तराद् भूयो ध्वनिरश्रूयत।

"भद्रे मम जननी नितरां वृद्धा पङ्गुश्च दीना निर्धना चैकाकिनी गृहमध्यास्ते। अहो मम मातुर्निरन्तरं मामेव ध्यायन्त्या महदशनेन कियान् किल हर्षः संभवेत्। त्वमपि पुत्रवत्यसि जानासि च पुत्रवियोगस्य वेदनाम्। हे दयानिधे। आर्तायाः जनन्याः कृते दयां कुरु"। इति।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तद्वचने श्रुतमात्र एव गिरिजाया वलीभिर्भीषणं मुखं सहसा सौम्यतामवाप मातृवात्सल्यसम्पूर्णहृदया भूतचरं वृत्तान्तं निजप्रतिज्ञां च क्षणं विस्मृत्य वन्दिनो मातुश्चिराद् भाविनं पुत्रदर्शनप्रमोदातिशयमेव चिन्तयितुमारेभे ।

अथ दैवेन वलात्प्रेरितेव गुर्वीं रज्जुं कूपे न्यपातयत् । जलस्खालनध्वनिर्बहिरश्रावि । ततश्च कूपान्तः शृङ्खलाया झणत्कारः प्रत्यध्वनत् । अथाचिरात्कूपान्निर्गतो युवा वृद्धायाः पादयोः पतितोऽभूत् । "याहि, याहि निशागमात्प्रागेव गृहमि"त्यादिष्टो युवा मौनी तच्चरणौ पुनः पुनर्निपीड्य दण्डवत्प्रणम्यच कृतार्थः स्वगृहं प्रतस्थे । यावदसौ दृष्टिपथमत्यक्रमीत्तावत्तमेव विलोकयन्तीगिरिजा ववल्गे । तदनु दीर्घं विनिश्वस्य शनैः शनैः कुटीरमुपासरत् ।

अथास्तमिते प्रभाकरे तदनुगामिनी छाया विविधविकृताकारधारिणी प्राङ्गणस्य कोणे लुलोठ । गिरिजाच विषण्णमनाः सर्वाङ्गैरवसीदन्ती शयनागारं विवेश । आत्मनो घोरप्रतिज्ञायाः परिणामवैफल्ये चेतसा कलयन्ती कामपि वेदनामन्वभूत् ।

"अहो प्रतिज्ञायामस्यां क्षणसिद्धिमुपैष्यन्त्यामपि चिरात्प्रतिपालितः संधिर्मूढया मया यापितोऽभूदिति शोचन्त्यास्तस्याः समुल्लासः सन्ध्याप्रकाशेन सह क्षयं जगाम। गाढानुशयेन वर्धमानेन समाक्रान्ता तिमिरेणेव जगती न चिचेद देव सा नष्टकान्तिरभूत् । अथ विशेषतो वृद्धीभूता शनैः शयनीयं यावदुपसर्पति तावन्निर्वाणप्रायेव दीपिका निस्तेजाः स्नेहशून्या च समजनि । गुरुगुरुः करुणयार्तरवं कुर्वाणा निजमरतकं च ताडयन्ती विवशमात्मानं शयनीये न्यपातयत् । भूयोभूयः शयनादुत्थाय भित्तिलम्बितं पुत्रस्य चित्रमुपेत्य दीनदीना तं क्षमां प्रार्थयामास ।

पुष्पिका– क्लिष्टस्य सुजातस्य सौजन्यं नापयास्यति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यथा वाचस्तथा क्रिया (?)

लेखकः—देशपांडेकुलोत्पन्नश्चन्द्रकान्तः । महाडनगरे कोंकणशिक्षणसंस्थाया आङ्ग्लविद्यालये षष्ठवर्गे (STD. VI) विद्यार्थी ।

[केचिन्महाशया वचनानुरूपं नाचरन्ति । तानेवोद्दिश्य लिखितैषा नाट्यच्छटा (monologue) ।]

[सभायाम्] ....स्वराज्यमेव तावदस्माकं जन्मजातोऽधिकारः वन्यपशवोऽपि पञ्जरे स्थापिताः क्षुभ्यन्ति । वयं तावन्मानवा एव । वयं तस्मात्पारतन्त्र्ये उषितुं न शक्नुमः । कथञ्चिदपि वयं स्वातन्त्र्यमाप्नुवामैव । स्वराज्यतृष्णां सुराज्येन शमयितुं न शक्यम् । तां च तथा शमयितुं न कोऽप्यस्मानादिशेत् । एतस्मादधिकतरं वक्तुं नाहं शक्नोमि ।

* * * *

[गृहे] ....अहो किमेतत्....भोः सेवक! क्वासि मूर्ख ।....पश्यानेन शुकेन पञ्जरायनमारब्धम् । किमर्थं त्वया पञ्जरद्वारमपावृतमेव स्थापितम् । ....तं पञ्जरमत्रानय । गृण्हामि तावच्छुकम् ।...आः चर्वति शुकः । ...भोः सेवक! आवृणु द्वाराणि वातायनानि च । नो चेत्पलायिष्यत्येषः । ...भोः चर्वितमनेन । ...पश्य पश्य पलायित एषः । गृह्हाण तम् । ....गृहीत एषोऽन्ते ।....तच्छस्त्रमत्रानय । अस्य पक्षापिच्छानि कर्तयितव्यानि । ....इत इतः कृतघ्न शुक ! भूयतां पञ्जरे एव भवता । ....श्रमाद्विनाऽन्नं लभतेऽत एव मत्तो भवान् । यदि पुनः पलायितुं प्रयतिष्यते भवांस्तर्हि मरिष्यत्येव ।

काष्ठौषधि वनस्पति सङ्ग्रह मार्केट बेळगांव.
प्रोप्रायटर, पद्माकर नारायणराव जेरे.
आयुर्वेदीय औषधगळू हागू ताजा वनस्पतिगळू, आयो काडेगळू पुडिकेगळू चूर्णगळू, मत्तु इतर बेरे बेरे औषधगळू योग्य किम्मत्तिनल्लि दोरेयुव विश्वासद मुख्य स्थळवेंदरे इदे.
काष्ठौषधि वनस्पति संग्रह
मार्केट, बेळगावि.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(२२०)

धीरा गिरिजा।

लेखकः—देशपाण्डेकुलोत्पन्नश्चन्द्रकान्तः। महाङ्गनगरे कोंकणशिक्षणसंस्थाया आङ्ग्लविद्यालये षष्ठवर्गे विद्यार्थी।

आसीद्धित्रपुरे कश्चन निर्धनः कृषीवलः। तस्य किल सुमुखी, गृहकर्मदक्षा, पितृपरायणा च गिरिजानाम्न्येका कन्या बभूव। अथ तस्यैव नगरस्य राजा चन्द्रकेतुनामधेय आसीत्। सोऽप्यविवाहितोऽब्रवीद्यन्न स्त्री पुरुषस्यार्धाङ्गी भवितुमर्हति। यतः स्त्रियः केवलं शक्तिहीना इति। तदा तैः पुनर्विज्ञापितं तर्हि भवताऽभिमतया स्त्रिया सह विवाहः करणीयः इति। अनन्तरं कथंकथमपि स राजा तथा कर्तुं सज्जोऽभवत्। कैश्चिद्दिनैश्च वध्वन्वेषणार्थं प्रस्थितः।

एकस्मिन्दिने कृषीवलकन्या गिरिजा सूर्योदयात्प्रागेव समुत्थाय गृहकर्माणि कर्तुमारेभे। तदा हे बाले किमर्थं च सूर्योदयात्प्रागेवोत्थाय गृहकर्माणि कुरुषे? इति पित्रा पृष्टा सा प्रत्यवदद्यद्य महाराजश्चन्द्रकेतुर्वध्वन्वेषणार्थं प्रस्थितोऽनेनैव मार्गेण गमिष्यतीति मया श्रुतम्। तं द्रष्टुमेवोत्सुकाऽहमिति। एवं वदतोस्तयो राजा चन्द्रकेतुः स्वयमेव कृषीवलगृहं प्रविवेश। गृहं प्रविष्टं महाराजं चन्द्रकेतुं प्रणेमतुः गिरिजाकृषीवलौ। तदा कृषीवलमब्रवीच्चन्द्रकेतुर्यदहं तव कन्यां विवाहयितुमिच्छामीति। कृषीवलोऽब्रवीद्यथाभीप्सितं कुर्वन्तु देवपादा इति।

चन्द्रकेतुर्गिरिजां पुनरुवाच त्वया ममेच्छयैव वर्तनीयम्। उक्तमात्रैव ममाज्ञा कर्तव्या। एतत्तव सम्मतमस्ति चेत्तदैव त्वां राज्ञीं करिष्यामीति। गिरिजा झटिति प्रत्यवदत् "सम्मतं मम देवपादानां वच" इति। तदा सा राज्ञा राजधानीं नीता विवाहिता च।

अथ समाप्ते विवाहकर्मणि चन्द्रकेतुर्गिरिजायां दुष्टभावेनाऽवर्तत। किन्तु पतिपरायणा गिरिजा सर्वदा पतिव्रताभावेनाचरत्। गतेषु त्रिचतुरेषु वर्षेषु गिरिजा सुलक्षणं कन्यारत्नं प्रासूत। हैमवतीति नाम कृतं तस्याः। किन्तु दुष्टश्चन्द्रकेतुस्त्यज्यतां हैमवतीति गिरिजामादिदेश। हन्त! दुष्करं खलु

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सोढुमपत्यविरहः । पतिव्रता तु गिरिजा पत्युराज्ञेति स्वकन्यामपि त्यक्तवती ।

अनन्तरं कतिपयैर्दिवसैर्गिरिजा पुत्रमेकं प्रसूतवती । स पुत्रः खलु गिरिजायाः प्रतिमा इवासीत् । राज्ये सर्वेऽपि तं प्रशशंसुः । केषां वा पितृणां न प्रियः स्वपुत्रः ? । किन्तु नरराक्षसश्चन्द्रकेतुर्गिरिजामाहूय " न कृषीवलकन्यायाः पुत्रोऽस्माकं युवराजो भविष्यतीति राज्ये सर्वोऽपि भणति " इति असत्यमेव तस्यै कथयामास । अतस्त्यज्यतां पुत्रोऽयीति आदिष्टवति राज्ञि स्ववचनं स्मरन्ती गिरिजा धैर्यमालम्ब्य तदप्यकरोत् । अहो सह्यः खलु कन्याविरहो न पुनः पुत्रविरहः । पाषाणहृदया खलु गिरिजा यैतावति दुःखेऽपि न मृता ।

एवं बहूनि वर्षाणि व्यतीयुः । चन्द्रकेतुर्गिरिजायां पूर्ववद्दुष्टत्वेनैवावर्तत । अथैकदा तां समाहूय " द्वितीयं विवाहं कर्तुमना अहं " इति तस्यै कथितवान् । किमेतावता ? किन्तु " मम नूतनपत्न्यास्त्वमेव स्वागतं कुरु " इति तामादिदेश । अहो निर्दयतैषा । स्त्रीभ्यो हि सपत्न्युत्कर्षान्मरणमपि रोचतेतराम् । किन्तु पतिपरायणा गिरिजा तदपि कर्तुं सज्जाऽभवत् । अहो धीरता खलु गिरिजायाः ।

सम्प्राप्तोऽसावन्तेऽमङ्गलो दिवसः । राजा चन्द्रकेतुः, सह नूतनपरिणीतया वध्वा श्यालकेन च, नगरं प्रवेष्टुमारेभे । हा धिग्दैवम् । राज्ञी गिरिजाऽपि सपत्न्याः स्वागतं कर्तुं गता । राजानं चोवाच " देव यदि दुर्दैवान्न स्निह्यसि मयि, न तथा करणीयमस्याम् । कोमला दृश्यते खल्वियमिति । नृपोऽपि तदा सगद्गदमवदत् " देवि, देवि, धिङ्मां पापं, येन पीडिताऽसि व्यर्थम् । पर्यैक्ष्यतैव भवती मया । सुवर्णस्य विशुद्धिः श्यामिकाऽपि वा वह्नावेव सँल्लक्ष्यते । क्षमस्व माम् । नैषा तु मम पत्नी । किन्त्वस्मत्कन्या हैमवती । एष च अस्मत्कुलालङ्करणं युवराजः । परीक्षिताऽसि मया "। तदा " साधु पतिव्रते साधु " इति वचनैस्तुष्टुवुस्तां जनाः । तदा ह्यन्त समजायत महान् आनन्दोत्सवो नगरे ।

(The Patient Griselda आङ्ग्लकथायाः सङ्क्षेपनम्)।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नलिनी बाला

ले. काश्यपः

आसीन्नलिनी नाम काचिल्ललना ललितांगी विलासपुरे । कस्मिंश्चिदपि महाविद्यालये बी. ए. कक्षायामधीतेस्म । अतिधनाढ्यः श्रीमानस्याःपिता निवृत्तो विद्याविभागाधिकारतः सुखमधिवसतिस्म तस्मिन्नगरे । विलासवती च सा बाला विद्यालये गहनं विषयं फलकसन्निहिते विवेचयत्यपि प्राध्यापके समन्ततस्तरुणैरुपाक्षिप्तानि पत्राणि वीक्षमणा कमलाक्षी सकटाक्षक्षेपं तान् प्रेक्षमाणा स्मेराननना प्रत्युत्तररूपाणि पत्राणि सत्वरं विलिख्य प्रतिक्षिपन्ती सर्वेषामपि विद्यार्थिनां मनोनयनान्यानन्दयन्ती कालमतिवाहयति स्म । परं तेषु सर्वेषु एक एव कश्चिद्युवा नलिनीमिलन्मिलिन्दायमानचरितो धीरेन्द्रनामा तस्या मनस्सम्यगपहृत्य तामात्मसादकरोत्। विद्यालयतो निष्क्रम्य गृहमुपेत्य पुस्तकादीनि विक्षिप्य गृहकपाटे वायुसेवनाय नगरतः क्रोशार्धसन्निहिते गिरिशिखरे जलप्रपातमनोहरे विजनप्रदेशे तावुभौ नलिनीधीरेन्द्रौ परमानन्दनिमग्नौ विविधसुखसंलापसुखमनुभवंतौ सरससरसैर्विविधैर्विहारैः कालमतिवाह्य स्वावासमुपागच्छताम् । स तु युवा धीरेन्द्रकुमारो विलासपुरोपान्तवर्तिनि कस्मिंश्चित् कुग्रामेनिवासी निष्किंचनः साहसप्रियो मेधावी महोदारकृतोपकारो बी. ए. कक्षायामधीतेस्म । एकस्मिन् दिवसे संध्यातपलोहिते च गिरिशिखरे यथाक्रममुपागतः पूर्वमेवोपेत्य समुपविष्टां चिंतातान्तमुखीं नलिनीं समवलोक्य शनैः शनैर्निक्षिपन् पदानि तत्पृष्ठत आगत्य कमलदलविशालं लोचनयुगलं करतलतरलांगुलिदलैः पिहितमकरोत् ! उत्फुल्लमुखी स्वकरतलेन तं परामृशंती मनोनयनवल्लभो धीरेन्द्र एव भवान् । जाने ते चपलताम् । कः पुनरधन्यो मत्परामर्शसुखं लभेतेति वदन्ती व्यमोचयत्तत्करयुगलम् । ततस्स तस्याः पार्श्वे समुपविश्य मुखचन्द्रमसमवलोक्यन्नवादीत्-सुभ्रु कश्चिताहेतु राहुस्तव मुखविधुं ग्रसितुमभिलषति । वदतु भवती । भगवानिव चक्रेण तमहं हन्मीति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

साऽब्रवीत्-हृदयवल्लभ! अद्य किल विद्यालये प्राध्यापको दण्डपाणिमहोदयो मदीयं पुस्तकमेकमयाचत। अहं च तद्दत्तवती। तस्मिन्नेव भवल्लिखितं सम सर्वांग-सौन्दर्यवर्णनपरं कवित्वभासुरं पत्रमासीन्निहितम्। अर्थात्तत्पत्रं स विलोक्य दर्शयेन्नः पित्रे। ततश्च महाननर्थोपनिपातो जायते इति अयमेव मे चिन्ताहेतुः। अतो भवान् इदानीमेव दण्डपाणिनः प्राध्यापकस्य गृहस्थितं पुस्तकमन्विष्य तत्पत्रं हस्तसात्करोतु। तत एवावयोस्संगतं श्वः सुखाय भविष्यति नान्यथेति वदन्ती समुत्तस्थौ। सोऽपि सधैर्यमुत्थितो बाहुपाशेन तामालिंग्य गाढम् देहि मे अनुज्ञामिति वदन् संचुंब्य विंबाधरं ततो निरगात्। सापि प्रशान्तहृदया स्वं गृहमगात्। सोऽपि तत्पत्रं सम्पादनीयमिति विचिन्तयन् तत्प्राध्यापकस्य दण्डपाणिमहोदयस्य मन्दिरमुपागान्निशि नवत्रण्ठावादनावसरे। 'लिम्पतीव तमोंगानि वर्षतीवांजनं नभ' इत्र सर्वतः प्रसृत्तमासीत्। धरिन्द्रकुमारोयं यावदभ्येत्य स्वांगवस्त्राणि पिण्डीकृत्य विमोच्य बहिर्द्वारवेदिकायाः कोणे विधाय कृष्णवस्त्राच्छादितकलेवरो गृहाङ्गणगतमुपवनं प्राविशत्तावद् दण्डपाणिरायो द्वित्रैर्मित्रैः संलपन् अन्तर्गृहाद्बहिरंगणोपवनमागात्। तेषु कश्चित् पीतार्धशेषां ज्वलंतीमेव धूमवर्तिकां लतांतर्गूहितशरीरे धीरेंद्रे निक्षिप्य कुत्रचिदगाद् मित्रसहितः। दण्डपाणिरायोपि पुत्रैराहूतो भोजनार्थमंतर्गृहमगात्। समयोऽयमेव कार्यसिद्धिकर इति समुत्थाय स धीरेंद्रः स्वांगदहनोद्यतं धूमवर्तिशेषं निष्कासयन् प्राध्यापकमन्दिरं प्रविश्य पुस्तकान्यन्वेषयन् नलिन्याः पुस्तकमुपलभ्य मुक्तिमेव करतलगतां मन्यमानः प्रतिपत्रं पुनःपुनरन्विष्यापि तदलाभेनोद्विग्नहृदयस्ततो निराश एव निष्फलप्रयत्नो बहिरगात्। तावद् बहिर्वेदिकानिहितं तद्वस्त्रजातं कोपि अपहृत्य पलायात्। अन्धकारे तं मुण्डन्तमपश्यन्नेव पुनर्विशेषेणोद्विग्नहृदयः किंकर्तव्यमूढः कथमहं कृष्णवस्त्राच्छादितः परेषां दृष्टिगोचरः स्यामिति शनैःशनैर्गच्छन् कस्यचिद्रजकस्यापणमवलोक्य नितांतं जहर्षच। नलिनीधीरेंद्रयोरालापं निगूढः श्रुत्वा तयोर्विघ्नं कर्तुमभिलषन् कश्चिदन्यो यूनोर्वस्त्रजातममुष्णात्। स धीरेंद्रोपि रजकादपेक्षितमेकं अंगवस्त्रं भाटकेन गृहीत्वा मनःशान्तिमलभमानश्चित्रपटावलोकनेच्छया चलच्चित्रपटदर्शनालयं प्रविवेश। तत्र च चलच्चित्रपट-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्रामावसरे पार्श्वोपविष्टः कश्चित्तरुणो मुहुर्मुहुरंगवस्त्रमस्यावलोकयन् अपृच्छत्-किमहो मदीयमंगवस्त्रमिदं तवांगे कथमिति। ममेदं न तवेदमिति विवदमानयोस्तयोरेको रक्षापुरुषस्तदंगवस्त्रपरिचयं यदाऽपृच्छत् तदा स निजस्वामी वस्त्रस्यास्यैकदेशे स्वं नामैव प्रादर्शयत्। ततश्च कोऽयं सुशिक्षितश्चोर इति रक्षापुरुषस्तं धीरेंद्रमाकर्षन् स्वाधिकारिसन्निधिमुपानयत्। अधिकारी च स धीरेन्द्रस्य पूर्वपरिचितं मित्रमेवासीत्। स एनमुपनतमवलोक्यैव संजातहासः 'किमरे! किं किमिति पृष्टवान्। स धीरेंद्रोपि रहसि सर्वमाचचक्षे ततः स रक्षापुरुषाधिकृतस्तदंगवस्त्रं तस्वामिने दत्त्वा पुनरात्मगृहतोऽन्यवस्त्रजातमानाय्य तस्मै अदात्। ततश्च परदिने पुनरागात् गिरिशिखरोपान्तम्। तदापि ततः प्रागेव समुपागता नलिनी तमागतमवलोक्य चोच्चैर्हसन्ती तत्स्वागतमकरोत्। नलिनि! किमिदमुपन्यस्तवती ह्यः इति प्रश्नात्प्रागेव सा स्वगृहे एवान्यस्मिन् पुस्तके तत्पत्रमुपलब्धं, प्राध्यापकदत्ते नैवासीत् त्रिस्मरणवशादेवमुपन्यस्तं मयेति उत्तरमदात्। ततश्च स धीरेंद्रोपि स्वं साहसवृत्तसमवर्णयत्। तदुपश्रुत्यतु सा अत्युच्चैर्हसंती तमाशिथिलस्वयंग्रहाश्लेषेण प्राहर्षयदतितराम्।

साहसपरिश्रमयोः किम्फलम् इत्यापृष्टा सा स्पष्टमावेदयत्—किमन्यदेतस्मादपि फलं विशिष्टमिति। भिंगधाररसमाधुरीमास्वादयन् स धीरेंद्रोऽब्रवीत् नैतावत्फलमस्य साहसस्य यत्प्रत्यहमत्येवेदम्। अतोन्यदधिकसुखनिदानं फलमपेक्ष्यते इति प्रत्युत्तरमदात्। भवतु भवतु तत्फलं श्व एव लब्धा भवानिति वदन्ती ततो निरगात्। ततश्च परदिने प्रातरेव समाहूतो नलिन्याः पित्रा—भवतु भवान् नलिन्याः प्रियः पतिः। नास्ति च मे पुमपत्यम्। अतो नलिन्येवावयोर्जननीजनकयोर्वैहिश्चराः प्राणाः अतो भवानपि मेघाविमूर्धन्यः सशक्तो दृढांगस्तरुणो रूपसम्पन्नश्च। विशेषतश्च नलिन्यां भ्रमरायमाणचेताः। अतोस्मद्गृहे एव तिष्ठन् जामाता भूत्वा वृद्धानस्मान् प्रीणयतु नितरामिति।

ततश्च शुभे सुमंगले मुहूर्ते विवाहितौ नलिनीधीरेंद्रौ अमन्दमानन्दमन्वभवताम् इति शम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अनुकरणीयोऽयमुपक्रमः

अयि गीर्वाणवाणीप्रसारणबद्धपरिकरा महाभागाः! वयमतितरां प्रमुदिताः स्मो नवीनममुमुपक्रममवलोक्य—यद्—अत्रत्याया गीर्वाणवाग्वर्धिनीसभायास्तथा मधुरवाण्याश्च सम्पादकास्तथा संचालकाश्च संस्कृतभाषाप्रसारहेतुना माध्यमिकविद्यालयेषु विशिष्टं कार्यक्रमं प्रावर्तयन्। सोऽयमभिनन्दनीयः अनुकरणीयः प्रवर्तनीयश्च सर्वथा सर्वत्र सर्वदापीति। सर्वेष्वपि नगरेषु संप्रति माध्यमा विद्यालयाः, विद्यालयेष्वपि शतशो विद्यार्थिनो विद्यार्थिन्यश्च विद्यामधिगच्छन्तीत्यपि निर्विवादम् सिद्धऽएव विषयः। तत्र संस्कृतभाषाति-कठिना, व्याकरणविषयाश्च गहना दुर्बोधाश्चेति बहवो भिया संस्कृतं परित्यज्य अर्धमागधा भाषामधीयते छात्रा इति शृण्वन्तो नितांतं विषीदामहे। प्रत्येकशो जगति विद्यमानाः सर्वा अपि भाषाः सुबोधा दुर्बोधा अपि भविष्यन्त्येव यथा प्राकृता अपि भाषा नित्यव्यवहारयोग्याः सरलाः सरसाश्च वर्तंते तथा संस्कृतभाषा अपि व्यवहारयोग्या सरला सरसा चेत्यत्र नास्ति सर्वथा विप्रतिपत्तिः। इमामेव बुद्धिं विद्यार्थिषु विद्यार्थिनीषु च समुत्पाद्य संस्कृते प्रावीण्यं प्रीतिं चोत्पादयितुं तत्रतत्र गीर्वाणवाग्वर्धिन्यः सभाः प्रवर्तिता विद्वद्धुरीणैः। तथाचात्रत्यगीर्वाणवाग्वर्धिनीप्रमुखसंचालको मधुरवाणीसहसम्पादकः श्रीमान् बुर्शीश्रीनिवासाचार्यो नगरे विद्यामानेषु विद्यालयेषु सभां संचालयितुमभिलषन् तांस्तान् विद्यालयाध्यापकान् संपृच्छ्य विचारविनिमयेन नितरामभिनन्दनीयोऽयं कार्यक्रम इति बहुभिराश्वासितोऽभूत्। प्रथमतः शहापुरे "चिंतामणरावहायस्कूल" इत्याख्यविद्यालये प्रधानाध्यापकः श्रीमान् कुलकर्णीमहाभागः स्वीयविद्यालयाध्यापकानां श्रीवष्ट दाण्डेकर दामलेप्रभृतीनां मतं सोत्साहमुपलभ्य भाद्रपदे शुक्लत्रयोदश्यां रविवासरे १२।९।४३ तमे तारके सुरसरस्वतीसेवामहोत्सवमतिविजृंभितं प्रावर्तयत्। तत्र यः कार्यक्रम आदरणीयः अनुकरणीयश्च संप्रवृत्तः। स वृत्तान्तोऽन्यत्रास्मि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नेवांके प्रकाशितश्च । वेळगांवनगरालंकारभूता माध्यमविद्यालयाध्यापकाः सरदार मॉडल वेनस्मिथ महिला विद्यालयीनाः प्रतिमासमेकैकस्मिन् अनेक-संवादाभिनयपुरस्सरं प्रवर्तयितुमाश्वासयन्नेव। इममेव कार्यक्रमं तत्रतत्र सर्वेषु नगरेषु विद्यमानाः विद्यालयाध्यापकाः स्वस्वविद्यालयेषु विद्यार्थिनीर्विद्यार्थिनः प्रोत्साह्य प्रवर्तयन्तु । तथाचासाधारणं प्रेमाणमुत्पाद्य संस्कृतभाषायां मातृ-भाषायामिव प्रावीण्यं संपाद्य सुरभारतीप्रेमास्पदान् कुर्वन्तु इत्यभ्यर्थयामहे ।

शहपुरे सुरसरस्वतीमहोत्सवः

प्रत्यक्षदर्शी

भाद्रपदे शुक्लत्रयोदश्यां रवौ सप्तांबरमासीये द्वादशे दिनांके चिं. हा. माध्यमिकविद्यालये महोत्सवोऽयं बहुविजृंभणं प्रवर्तितः । द्विशताधिका विद्यार्थिन्यो विद्यार्थिनश्च सम्मिलिता आसन् । बहवो वेणुग्रामस्थास्तत्रत्याश्च शास्त्रिणो विद्वद्वरा अध्यापका इतरे च तेते संस्कृतप्रणयिनो नागरिकाश्च प्रमुखाः सन्निहिता आसन् । सुसज्जितभद्रासनालंकृतमासीत्सभामान्दिरम् । प्रथमतस्तावत्काचिद्बाला मंगलगीतं सुमंजुलमगायत । ततस्तद्विद्यालयप्रधाना-ध्यापकः श्रीमान् कुलकर्णीमहाभागः सरलया सरसया च वाण्या सर्वेभ्यः स्वागतं व्याहरत् । ततो मधुरवाणीसम्पादकः 'संस्कृतसाहित्यरत्नं' श्रीमान् गुलगलीरामाचार्यमहाभागः संस्कृतभाषामहत्त्वमुपवर्णयन् तत्प्रसारणार्थं बद्ध-परिकरयोर्मधुरवाणी—गीर्वाणवाग्वर्धिनीसंस्थयोः परिचयं निरूप्य सभाध्यक्ष-पदमलंकर्तुं आंग्लशालाशिक्षकशिक्षणमहाविद्यालये संस्कृतप्राध्यापकं नैक-संस्कृतपठ्यपुस्तकनिर्माणसुप्रसिद्धं श्री. एस. आर. भट महोदयं व्यज्ञापयत् । ततः चिं. हा. वि. अध्यापकः श्रीमान् दामलेमहोदयः संस्कृतसरस्वतीसेवा-महत्त्वमुपपादयन् अध्यक्षपरिचयसूचनामन्वमोदत । ततोऽध्यक्षमहोदयाः प्रस्ता-विकं भाषणमुपन्यस्य अस्मिन्संवादकार्यक्रमं रंभापत्रसूचयन् । ततः कश्चि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

द्विद्यार्थी सधैर्यमुपस्थितः साभिनयं अग्रिमकार्यक्रमप्रास्ताविकमतिसुन्दरमुपन्यास्यत्। उत्तररामचरित्रांतर्गते कुशलवयोर्वृत्तान्ते इन्दुडिंगेकरनाम्नी कुमारी आत्रेयीपात्रं, इन्दुमुण्डलेनाम्नी कुमारी वासन्तीपात्रं परिगृह्य सरसाभिनयेन वाक्सौन्दर्येण च सर्वानपि सभिकान् समरंजयताम्। डिगीकर उमेशो गाडगीळप्रभाकरश्चेत्युभौ कर्णाश्वत्थाम्नोः महादेवरेडेकरगिण्डे विष्णुनामानौ कृपदुर्योधनयोः पात्राभिनयेन सभास्तारान् अतितरामप्रीणयताम्। तथैव ममदापुरमालचन्द्रः कागतीकरनागेशः कामतमधुकरश्चेत्येते भार्गवरामस्य दाशरथ्योश्च पात्राण्यभिनीय प्राहर्षयन्। तदनु कुमारीत्रयं मालनभट नलिनीमजलीकर मिस मुळेरूपं श्रमविभागतस्त्वमुद्दिश्यसंवादमेकं साभिनयया जन्मभाषयेव सहजया वाक्करण्या प्रदर्श्य सभिकान् चित्र-हृदयान् चित्रलिखितान करोत्। बेनस्मिथविद्यालयीनो विद्यार्थी ब्रह्मचारिणो धर्मान् शुक्रकथाया भागं च अवाचयत्। ततश्च मधुरवाणीसहसंपादकाः सं. सा. भूषणा वुर्लीश्रीनिवासाचार्याः, सरदार विद्यालयाध्यापक्ता हुलिकविमहोदयाश्च संस्कृतभाषामहत्त्वं तदभ्यासस्यावश्यकत्वम् सम्यगुपापादयन्। ततश्च संस्कृतभाषापाटवसम्पादनोपयुक्तसरलोपायप्रदर्शनपुरस्सरमध्यक्षमहाभागाः सुस्पष्टया सरसया च वाण्या समारोपमकुर्वन्। ततोहि चिं. वि. संस्कृताध्यापकाः काव्यतीर्थ श्री. शं. गो. वष्टमहाभागाः समागतान् सर्वानपि अध्यक्षप्रभृतीन् धन्यवादवितरणपुरस्सरमतिसरसमभ्यनन्दन्। ततो विद्यार्थ्यपि स्वरचिताभिनयसंदर्शनेन प्रोत्साहं व्यतरन् भवन्त इति सर्वानभ्यनन्दत्। ततो बालिकाः सुमधुरस्वरं वन्देमातरं राष्ट्रगीतमगायंत। ततश्च सुमधुरमधुरोऽयं कार्यक्रमः सुरसरस्वतीसेवापरो महोत्सवः सर्वेषां गीर्वाणवाणीप्रणयिनां मनांसि अमन्दानन्दसिंधावमज्जयदित्यलम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding:.Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

महान् प्रहर्षप्रकर्षः

मधुरवाणी गीर्वाणवाणीचरणपरिचरणपरायणा तत्प्रसारणैकव्रता प्रियपाठकगणम् प्रीणयन्ती यद्घोरतरे महर्घतासमयेऽपि कर्णाटिकाभिजन अङ्क प्रकाशनोद्यतेति तु जानन्त्येव सर्वे तत्प्रणयिनः । तत्र किल केचिन्महोदाराः सुरभारतीरसिका यदप्रार्थिता अपि प्रत्येकशो मधुरवाणीश्रेयोवृद्धिमभिकाङ्क्षमाणा अनल्पेन धनदानेन प्राहर्षयन्नितरां तेन वयमतितरां प्रहृष्टाः प्रोत्साहिताश्च शतशः सहस्रशो धन्यवादांस्तेभ्यो वितरन्तः समभिनन्दामस्तमां तान् । तेषु किल परमोदारः श्रीमान् पुण्यपत्तननिवासी स्वनामधन्यो दिनकरबालूराव पराञ्जपेमहाभागः प्राच्यापकवरो मधुरवाण्याः श्रेयः पुष्टिमभिकाङ्क्षमाणस्त्रिंशद्रूप्याणि सम्प्रेष्य प्रोदसाहयदस्मान् । एवमेव मुंबईनगरालङ्कारभूता श्रीमती संस्कृतसाहित्यचन्द्रिका पण्डिता सौ. क्षमादेवीरावमहाभागा जन्मत आरभ्य मधुरवाणीमतिकरुणया पश्यन्ती सुरसरस्वतीसेवालोलाया लीलयैव ललितसंस्कृतभाषासंल्लापनिपुणायाः स्वनन्दिन्या लीलादेव्या विवाहमङ्गलमहोत्सववासरे सहजप्रेम्णा वत्सायै मधुरवाण्यै सौमङ्गल्यमभिकाङ्क्षन्ती त्रिंशद्रूप्याणि सम्प्रेष्य प्राहर्षयदतितराम् ।

श्रीमन्तः सुप्रसिद्धाः सुरभारतीप्रणयिनः कर्णाटकाभिजनाः भारते मोच्चपदमलङ्कुर्वाणा (डायरेक्टरजनरलपोष्टऑफिस व टेलिग्राफ) सर जी. व्ही. बेवूर आय. सी. एस. महाभागा मधुरवाण्यामतिप्रेम्णा सकरुणमभिवीक्षमाणाः प्रथमत आरभ्य प्रतिवत्सरं दशरूप्याणि सम्प्रेषयन्तः पोषकत्वमुरीकृत्य समन्वगृण्हन्निति निवेदयितुं महान्तः परमानन्दः । एवमेव मुम्बापुरीयवरिष्ठन्यायासनमलंकुर्वाणा (हायकोर्टजज्ज) सुरसरस्वतीसेवातत्पराः श्रीमन्तो एन्-एस्. लौकूरमहाभागा मधुरवाणीसंरक्षणाश्वासनेन समाश्वास्य चास्मान् प्रोदसाहयन्नेववेणुग्रामीयमुख्यन्यायासनाधीश्वराः (डि. जज्ज) सरससुरसरस्वतीसंसेवनविशदबुद्धयो महाराष्ट्रसाहित्यसेवाधुरन्धराः श्रीमन्तः पी. एम्-लाड आय्-सी-एस्-महाभागाः मधुरवाण्याः श्रेयोवृद्धये विशिष्टानल्पसाहाय्यकरणेनाश्वास्य प्रथमतो दशरूप्याणि तावद्वितीर्य मधुरवाणीं समप्रीणयन् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पुण्यपत्तनकृतवसतयो रं-ह-भाळुंकर महाभागाः दश रूप्याणि संप्रेष्य समर्पयन्मधुरवाणीम् । बडोदानगरनिवासिनो विद्वद्वराः सुरभारतीसेवापरायणा डॉ. हीरानन्दशास्त्रिणो महाभागाः काश्मीरविषयान्तर्गतजम्मूनगरालंकाररघुनाथसंस्कृतमहाविद्यालयप्रधानाध्यापकाः शास्त्रिवराः तथा भुंबईनगरश्रेष्ठिनः श्रीसरस्वतीकृपाकटाक्षभाजनाश्चुनीलालदेवकरणमहोदया अपि प्रतिवत्सरम् मधुरवाणीसहायकत्वमुरीकृत्य प्रोदसाहयन् प्रोत्सायहन्ति प्रोत्साहयिष्यंतीति च बाढमाश्वसिमो वयम् ।

श्रीवेंकटगिरिपरिसरप्रान्तवर्तिनि श्रीपद्मावतीक्षेत्रे विभ्राजमाना श्रीमन्मध्वसिद्धान्तोन्नाहिनी सभा प्रतिवत्सरं मधुरवाणीश्रेयोवृद्धये विंशतिरूप्याणि प्रेम्णा वितरति तथा मुम्बईराजधान्यां माधवबागस्थसंस्कृतमहाविद्यालयप्रमुखसञ्चालका व्याकरणाचार्याः श्रीरामचन्द्रशास्त्रिणो महाभागा मधुरवाण्यामादितः प्रभृति करुणापूर्णहृदया दशरूप्यकप्रेषणेन समन्वगृण्हन् । तथाच मधुरानगरस्थरामेश्वरदेवस्थानीयसंस्कृतमहाविद्यालयव्याकरणप्रधानाध्यापकाः कविकौस्तुभादिनैकग्रन्थकृतालंकृताः पं-के-एस्-कृष्णमूर्तिशास्त्रिणः तथा कोल्हापुरीयराजारामकॉलेजसंस्कृतप्राध्यापका डुपरीकरगणेशशर्माणो महोदयाश्च मधुरवाणीसहायकत्वमभ्युपेताइत्यावेदयितुं महानः सन्तोषः ।

इटावाबरालोकपुरान्तस्थितश्रीहरिहरौषधालयप्रवर्तका अनुभूतयोगमालासम्पादका वैद्यधुरंधराः कविराजश्रीविश्वेश्वरदयालुमहोदयाः प्रतिवत्सरमपि दशरूप्यकाणि संप्रेष्य मधुरवाणीपोषकमंग्यकुर्वन्नेव ।

अन्ये च बहवो मधुरवाण्या जन्मतः प्रभृति ग्राहकत्वमंगीकृत्य मूल्यदानेन मधुरवाणीमन्वगृण्हन्न ।

श्रीमत्परमहंसेत्यादिबिरुदावलिसमलंकृताः श्रीमद्द्वैतसिद्धान्तप्रतिष्ठापनाचार्याः श्रीसुब्रह्मण्यमठाधीश्वराः श्रीविश्वेशतीर्थचरणा जगद्गुरुवराः तथा श्रीमन्तो बळवन्तरावपोतदार बी-ए-एल-एल-बी-रिटायर फ. स्मा. जजमहाभागाः कोल्हापुरनगरालंकारभूता निवृत्तवरिष्ठन्यायाधीश्वरा रा-ब-कृ-ना-पण्डितरावमहाभागाः गद्वालसंस्थानवरिष्ठन्यायाधीशपदमलंकुर्वाणा वाचस्पतिश्रीगुण्डेरावहरकारे महाभागाः शमदमादिसम्पन्नाः परमभागवता गीर्वाणवाणीप्रणयिनः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीमासूरश्रीनिवासरावमहोदयाः तथा हुल्लीवृहन्मठाध्यक्षाः सरसनाम्पद्यरचनानुरंजितसमाजास्तर्कतीर्थश्रीनीलकण्ठशिवाचार्यमहाभागाः तथा कोल्हापुराभिजनाः पण्डितराजकुलालंकारा नारायणाचार्यमहाभागाश्च मधुरवाण्याः श्रेयोभिवृद्धये शाश्वतनिधिसंवर्धनाय भूरि धनं वितीर्य मधुरवाणीमन्वगृण्हन् करुणया। एवमन्येऽपि सर्वे गीर्वाणवाणीप्रणयिनः शाश्वतनिधावपि यथाशक्ति उत शक्तिमतिक्रम्यापि धनमनल्पमल्पंवाअशक्ता वितरन्तः श्रेयोभाजो भवन्तु इत्यभ्यर्थयामहे।

श्रीमती गद्वालसंस्थानमहाराज्ञी प्रजारंजनलब्धवर्णा प्रतिवत्सरं सहस्राधिकेभ्यो विद्वद्वरेभ्योऽनवरतभूरिधनवितरणप्रख्यातकीर्तिः मधुरवाण्यै प्रतिवत्सरमपि पंचविंशतिरूप्याणि वितरन्ती श्रेयस्सन्ततिं तनोति इति निरूपयितुं महान्तो हर्षः संजायते।

एवमभिनवभट्टवाणायमानः श्रीमान् एम्-पी-वाली एम्-ए--महाभागः, सुरसरस्वतीसेवैकबद्धादरः श्रीमान् एन्-एम् अक्कादास एम्-ए-एल्-एल्-बी फ. सबज्जमहाभागश्चानवरतं करुणया मधुरवाण्याः श्रेयोवृद्धिं संरक्षणं च वीक्षमाणौ यद्भयंकरेपि समये चिन्तासन्तानं पार्श्वभागे विक्षिप्य कर्तव्यतत्पराः कुर्वन्तौ प्रोत्साहयतः। सर्वेभ्य एतेभ्यो भैष्मी-मामाह्वयवल्लभो भगवद्गीतामृतवर्षी पार्थसारथिर्भक्तवत्सलो भगवान् अनुपममखण्डितमायुरारोग्यमैश्वर्यं प्रदाय अमन्दानन्दसागरे सपरिजनं समुह्वजनंमज्जयतात् इति सांजलिबन्धं समाप्तिं सानन्दं सोल्लासं सानुनयं साग्रहं संप्रार्थ्य विरमामो विस्तरात्।

मदिरेक्षणाशब्दार्थनिष्कर्षः

पं-टी-एम्-श्रीनिवासअयंगारमहोदयः प्रधानाध्यापकः श्री. भा-सं-सं-विद्यालये मद्रास

शाकुन्तले हि प्रथमाङ्के "वैखानसं किमनये"ति पद्यरत्नमुपलभ्यते तत्र शकुन्तलां दुष्यन्तमुखेन मदिरेक्षणां निर्दिशति कविकोकिलः कालिदासः।

तस्य च मदिरेक्षणाशब्दस्य सहृदयहृदयहारिणं कविहृदयानुसारिणं चार्थं वर्णयांबभूवुः व्याख्यातारः तत्सारस्यविज्ञातारः पण्डितप्रवराः अद्यावधि तमेवार्थं आदृत्य पाठप्रवचनादिकं कुर्वन्ति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इदानीं किल केचन पण्डिताः विमर्शव्याजेन संप्रदायागतार्थस्य तद्बोधकानां पण्डितप्रवराणां च दूषणेनैव स्वपाण्डित्यं प्रतिष्ठितं मन्यमानाः निरर्थकमेव तस्मिन्प्रयतन्ते । तेष्वन्यतमः कश्चन विमर्शकः मदिरेक्षणाशब्दस्य व्याख्यातृसम्मतमर्थं बोधयतः पण्डितान्स्त्रीयगोष्ठ्यां विनिनिन्द । यदा च तैरयमेवार्थः सरसो व्याख्यातृसम्मतश्चेति निपुणं न्यरूपि तदा स तान्हित्वा व्याख्यातॄणामप्यज्ञत्वं कल्पयितुं प्रावर्तत ।

इदानीं किल सः श्रीवैष्णवसुधानाम्न्यां कस्यांचिद्धिन्दीभाषापत्रिकायां मदिरेक्षणार्थविचारनामकं कंचिद्विचारं प्रवर्तयामास ।

तत्र हि " खञ्जाक्षी,, " खञ्जनयना,, इत्यादयः कविप्रयोगाः दृश्यन्ते अतस्तत्समानार्थक एवायं मदिरेक्षणाशब्दो भवितुमर्हति ,, " मदिरो मत्तखञ्जन,, इति कोशोपि दृश्यते । अतः मदिरस्येक्षणे इवेक्षणे यस्याः इति व्युत्पत्त्या मत्तखञ्जननयनतुल्यनयना इत्येवार्थो वर्णनीयस्स, एवार्थस्त्वरसश्च । एतं कोशमजानन्त एव व्याख्यातारो मदिरावदीक्षणं यस्यास्सा ....मदिरा यथा मोहजननी तद्वदेतदपाङ्गालोकनमपि विमोहजनकमिति भावः....। यद्वा मदिराशब्देन मनोहारितागुणवृत्त्या लक्ष्यते तादृगीक्षणं यस्यास्सा । यद्वा मदिरे मत्ते ईक्षणे यस्यास्सा । इत्यादिभिर्विरसार्थान्प्रदर्शयामास । " नहि सर्वस्सर्वं जानातीति हि लोकनीतिः । अतस्तेषां एतत्कोशानुधाविस्वादुतमार्थपरिज्ञानसमनन्तरं विरसार्थान्तरस्मरणमप्यनवसरमेव " किंच हरिणाक्षी मृगीदृक्,, इतिवत् खञ्जनाक्षी,, इति च कवयन्ति कवयः " श्रीहर्षश्चाह नैषधीयचरिते " नलिनं मलिनं रुचिगर्वदुर्विधम्,, इति" " खञ्जरीटस्तु खञ्जनः,, इत्यभिहितः पक्षिविशेषः प्रसिद्धः । तस्य नयने ललनामणिनयनयोः दृष्टान्तीक्रियेते, कविवरैः इत्यादिकं दर्शयति विमर्शकः ।

अत्र हि बहुश्रुता रसिकप्रवरा एवमभिप्रयन्ति- खञ्जरीटनयने सुदृशां दृशो नोपमानतया दीयेते । साक्षात्खञ्जन एवोपमानभावमर्हति " यतो विमर्शकोपात्ते श्रीहर्षश्लोकेऽपि " अञ्जनाञ्चिते तदीक्षणे खञ्जनरुचिगर्वदुर्विधं विदधाते इति तन्नयनसन्निधौ खञ्जनस्यैव गर्वशून्यता अदर्शि, नतु तन्नयनमात्रस्य । किंच खञ्जनो हि शुक्लकृष्णवर्णोऽतिसरलोऽतिचञ्चलश्च

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अल्पशरीरकः पक्षिविशेषः । तन्नयनस्य दीर्घता न स्फुटग्राह्या । न वा कविसमयसिद्धा । तर्हि " खञ्जनदीर्घनेत्रा,, इत्यादयः प्रयोगाः काव्येषु दृश्यन्ते । अतस्साक्षात्स एवोपमानतामर्हति । अत एवोत्तरत्रापि श्रीहर्षः " भ्रमिकणेऽपि तदीक्षणरवञ्जनः,, इति तदीक्षणं रवञ्जनतयैव रूप्यां-बभूवेति ज्ञायते । प्रबन्धान्तरेषु च विशिष्टस्स एव पक्षी नयनोपमानतया दीयते " रूप्यतेच । तथाहि " नेत्रखञ्जनगञ्जने,, " मुखारविन्दोपरिभागसंस्थं नेत्रद्वयं खञ्जनमामनन्ति । " नतभ्रुवोर्लोचनरवञ्जरीटौ ,, दृशौ रुचिरचञ्चलरवञ्जरीटौ,, इति । अतः शुक्लकृष्णवर्णस्स एव पक्षिविशेषः साक्षादुपमानतया देय इति विमर्शकोक्तखञ्जननयतुल्यनयनत्वबोधकविप्रहूवाक्यप्रदर्शनं अनुपपन्नम् ' ।

यदुक्तं विमर्शकेन मदिरेक्षणेत्यभिहितवतः कालिदासस्य खञ्जनविवक्षैव स्यात् इति । तत्कथं साधयितुं शक्यते । मदिराक्षी-मदिरेक्षणा इतिवत् यदि " रवञ्जाक्षी,, इति यत्र कुत्रापि कालिदासेन प्रयुक्तं स्यात्तदनुरोधेन विमर्शकोक्तोप्यर्थस्स्यादिति वक्तुं युज्यते । नतु तथा दृश्यते " कालिदासात्प्राचीना अपि खञ्जाक्षी,, इत्यादिकं न प्रायूञ्जन् । " अत्रहि विचारकुशलाः एवं अभिप्रयन्ति । खञ्जनस्याक्ष्युपमानता श्रीहर्षोपज्ञैव स्यात् अत एव तदर्वाचीनानां निबन्धेष्वेवायं प्रयोगो दृश्यते । नतु पूर्वतनेषु निबन्धेषु किंच मदिरेक्षणाशब्दश्शाकुन्तले प्रयुक्तः । विक्रमोर्वशीयेऽपि तुरीयेऽङ्के " मधुकरमदिराक्ष्याः शंस तस्याः प्रवृत्तिं,, मिति श्लोके मदिराक्षिशब्दः प्रयुक्तः । चन्द्रालोकेऽपि " प्रसन्नेन दृगञ्जेन वीक्षते मदिरेक्षणा, इति मदिरेक्षणाशब्दः दृश्यते । मालविकाग्निमित्रेऽपि शृङ्गारोल्लासे तृतीयश्लोके " आनन्दमङ्कुरयति स्मरणेन कापि रम्या दशा मनसि मे मदिरेक्षणायाः इति मदिरेक्षणाशब्दः प्रयुक्तः जगन्नाथकविना । तत्तत्प्रबन्धव्याख्यातारस्सर्वेऽपि शाकुन्तलव्याख्योक्तरीत्यैवार्थं प्रकटयाम्बभूवुः । नतुत्रिमर्शकोक्तमर्थंयः कोपि । अतस्सर्वेषामपि तत्तद्ग्रन्थव्याख्यातृणां एतत्कोशाज्ञत्वकल्पनं महत्साहसं स्यात् " भूयसां स्याद्बलीयस्त्वं,, इति भूयोनुग्रहन्यायः स्वस्येन्याय्यः । अतो वरं विमर्शकस्यैव तदाशयाज्ञत्वकल्पनं " नहि सर्वस्सर्वं जानातीति तदुपात्तः लोकन्याय स्तस्मिन्नेव जागर्तु इति ।।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किंच कालिदासानुक्तोऽपि श्रीहर्षश्लोकं पूर्वोक्तं कोशं चानुरुद्ध्य प्रदर्शित एवार्थो वाच्यः इत्यपि न समीचीनम्। तत्रहि "नलिनं मलिनं इति श्लोके श्रीहर्षेण अञ्जनाञ्चिते एव दमयन्तीनयने खञ्जनगर्वमुषी इति प्रत्यापादि। अत्र अञ्जनाञ्चिते इति नयनविशेषणं प्रयुक्तवतो महाकवेः श्रीहर्षस्यायमेवाशयः स्यात्। यत् अञ्जनानञ्चिते नयने खञ्जनोपमानतां नार्हत इति तथाच प्रकृते शाकुन्तले कथानायिका शकुन्तला वैखानसं व्रतमनुतिष्टन्ती आसीदिति अनेनैव श्लोकेनावगम्यते। अतश्चाञ्जनानञ्चिततदीयलोचनस्य खञ्जरीटो नोपमानतामर्हतीति किल तद्व्याख्यातार एतत्कोशाभिज्ञा अपि विमर्शकप्रदर्शितार्थस्य विरसतां जानन्त एव तथा व्याचक्रुः। ये किल सुराया निषिद्धनया निहीनतया च तद्वाचकमदिराशब्दः कथं कालिदासमुखान्निर्गतस्यात्। अतः खञ्जनार्थकमदिराशब्द एव प्रयुक्तो भवेदित्याहुः। ते किल महान्तः संस्कृतभाषानभिज्ञगोष्ठीषु कामं एवंविधान्प्रलापान्कुर्वन्तु। "उद्यानसलिलक्रीडामधुपानरतोत्सवाः,, इति सुरापानवर्णनस्यापि महाकाव्यलक्षणत्वं जानन्तस्तथैव महाकाव्येषु तद्वर्णनं प्रत्यक्षयन्तश्च रसिकासहृदयाः नैतच्छ्रद्दध्युः। यत्तु तेषामेव शक्तिलक्ष्यार्थयोर्मध्ये शक्यार्थवर्णनमेव गरीयः प्रकृतेच खञ्जननयनतुल्यनयना इत्याकारकशक्यार्थमुत्सृज्य व्याख्यातृप्रोक्तलक्ष्यार्थाङ्गीकरणं शास्त्रपरिपाटीविरुद्धमिति वचनं, तदपि शक्यार्थलक्ष्यार्थयोः भेदमजानतां शास्त्रवासनाविरहिणां महतामेवेति उपेक्षणीयम्

एतादृशदूषणान्युत्सृत्य स्वरसत्वास्वरसत्ववर्णने यतोऽयं विमर्शकः प्रवृतः अतस्तदुक्तार्थस्यास्वरसता प्रदर्श्यते। रसिकाग्रेसरा एवमभिप्रयन्ति। सुरा किल निषिद्धा निहीना अतो नोपमानतां अर्हति इत्युक्तिर्न संगच्छते। सुरा हि ब्राह्मणं प्रत्येव निषिद्धा अत एव "न मांसं राघवो भुंक्ते न चापि मधु सेवतेईति श्रीरामायणमपि संगच्छते। किंच ब्राह्मणस्यापि मधुसेवनमेव विनिन्द्यं, नतु तद्वाचकशब्दभाषणम्। यदि सुरायाः निहीनतनया नोपमानभावस्संगच्छते इत्युच्यते तर्हि मीनस्यापि निहीनत्वात् "मीनाक्षी,, इत्यस्यापि अर्थान्तरमुपवर्ण्यताम्। किंचखञ्जरीटस्यापि क्षुद्रजन्तुतया तदुपमानतापि दत्तजलाञ्जलि स्यात् यदिच खञ्जे शुक्लकृष्णरूपवत्त्वचांचल्यरूपानितरसाधारणधर्मस्य दर्शनात् तदुपमानता गता भवेत् तदा सुरायामपि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तथाविधमोहजनकत्वरूपस्य धर्मस्य विद्यमानत्वात् सापि उपमानभावमर्हत्येव । किंच खञ्जनतुल्यत्वोक्तया लोचनस्याकर्षकत्वमेव उक्तं स्यात् । तदपेक्षया मोहनजनकत्वस्यैव विशिष्टतया तद्धर्मप्रापकसुरापरत्वेनैव व्याख्यानं स्वरसम् । यत्तु स्वोक्तार्थस्य कोशानुसारित्वं स्वपक्षसाधकतया प्रतिज्ञातम् । न तदपि समीचीनम् मदिराशब्दस्य सुरापरत्वमपि कोशानुसार्येव यतो " मदिराकश्य-मद्येऽपि " इति नामलिङ्गानुशासनं जागर्ति ।

किंच सुराया उपमानतया उपादानं कविसमयसिद्धमेव । " ज्योत्स्नेव नयनानन्दः सुरेव मदकारणम् इति हि श्लोको दृश्यते । सुरात्वेन रूपणमपि दृश्यते " सेयं शीधुमयी वा सुधामयी वा ।

किंच यः पदार्थः येन उपमीयते तेन रूप्यते इत्यपि कविसम्मतः पन्थाः इत्येतन्न दुरपलपं ईक्षणस्य सुरात्वेन रूपणं बहुभिः कविभिरङ्गी-कृतमेवेति हि दृश्यते । " दृष्टिः कापि सुधा सुधास्मितमिदं वक्त्रं कलानां निधिः,, सुधाहालाहालाहलमयं तेऽक्षियुगलम् ,, सुधागरसुरामयी नवदृशोः कटाक्षच्छटा " इत्यादयः किल श्लोका अनेके दृश्यन्ते । यदि कालिदासी-यश्लोकस्य श्रीहर्षप्रयोगमनुसृत्य व्याख्यानमभ्यनुज्ञायते तर्हि एतादृशैः प्रयोगैः किमपराद्धम् । एवं च एतावता व्याख्यातृप्रदर्शितस्यार्थस्य कविहृदयानुसारित्वं सरसत्वं कोशाप्रधावित्वं इतरप्रबन्धानुविधायित्वं च अस्मिन्नेवार्थे वर्तते इति निपुणं निरूपितम् । अत एव हि भामिनीविलासे पूर्वोक्तश्लोकव्याख्यायामपि मदिरेव ईक्षणं अवलोकनं यस्यास्सा इति विगृह्य सुरासमसम्मोहकविलोकनाया इत्येवार्थ उपावर्णि । अन्ये व्याख्या-तारोऽपि पूर्वोक्तान्हेतून्पुरस्कृत्यैव तथा व्याचक्षुः । अतो विमर्शकस्त्वप्रद-र्शितम् " न हि सर्वस्सर्वं जानाति नयं स्वस्मिन्नेवातिदिशतु । किंच विश्वगुणादर्शव्याख्याया उदाहरणप्रदर्शनमपि न समीचीनम् । नहि तथा अर्थवर्णनमात्रेण तस्य पुराणानभिज्ञता कल्पयितुं सुशका । अनेकस्थलेषु पुराणवचनानि खलु तेनापि प्रमाणीक्रियन्ते एवंच कायाधव इत्यस्यान्योप्यर्थः वर्तते इत्येतत्प्रदर्शनार्थमेव तथा व्याख्यायि तेन । सर्वथा स्वोक्तार्थदार्ढ्याय बहुश्रुतानां प्रसिद्धव्याख्यातृणां दूषणं सहृदयहृदयनोदावहमित्येवायं विचारः प्रवृतः । न तु विमर्शकदुदूषयिषयेति विरम्यते । एतेन च सहृदयाः प्रसन्ना भवन्तु इति संप्रार्थ्यते इति सर्वशम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीशिवदण्डपाणिस्वामिदीक्षितानां महामहोपाध्यायानां चिदंबरवास्तव्यानां शिवपदप्राप्तिमुद्दिश्य, विषण्णेन कृष्णमूर्तिशास्त्रिणा विरचिताश्चरमाः श्लोकाः

प्रादुर्भूय पतञ्जलिर्जगति यः श्रीदण्डपाण्यात्मना
सर्वान्प्राहयितुं दयाजलनिधिर्भाष्यं महत्स्वात्मनः ।
कीर्त्यानुत्तमया व्यजेष्ट मखिराड्वंशावतंसः स्वयम्
सोऽयं संप्रति चित्सभेश्वरपदांभोजैक्यमासेदिवान् ॥१॥
स्वातन्त्र्यं बिभरांबभूवुषि परं सर्वेषु तन्त्रेष्वपि
प्रक्रान्ते परिगर्जितुं परिषदि श्रीदण्डपाण्याह्वये ।
पारीन्द्रे, पविशब्दतोऽहय इव प्राप्ताधिकास्थिज्वराः
येऽभूवन्बुधसामजास्सम इमे कालानुकूल्यं गताः ॥२॥
शास्त्राध्यापनफक्किकां कथमिमे संवर्णयामस्सुधी-
सम्राजामिह यज्वनां श्रवणयोः पीयूषवर्षोपमाम् ।
शास्त्रार्थः स्वयमध्यगच्छदखिलश्शिष्यत्वमासेदुषा
मस्माकं यदनुग्रहाद् गुरुवरास्ते देवभूयं गताः ॥३॥
आकृत्या च गिराऽल्पशेरततमां श्रीदक्षिणामूर्तिम-
प्याम्नायान्तरहस्यबोधनविधावाचार्यपादा इमे ।
शेषं वाग्मितयाऽन्वकार्षुरनिशं मन्दस्मितेनाञ्चिता
व्याहार्षुर्मधुरं, समेशचरणौ प्राणंसिषुः प्रत्यहम् ॥४॥
छात्रेभ्योऽमुलभं न केवलमदुर्ज्ञानं बुधैश्श्लाघितम्
किन्त्वव्याजकृपारसोर्मिलहृदो गर्ह्येतरां जीविकाम् ।
किञ्चाद्वैतसभां बुधेन्द्रमहितां प्रातिष्ठिपन्यत्नतः
शास्त्रोज्जीवनकर्ममार्गरसिकाः किंकिं न चक्रुर्भुवि ॥५॥
श्लिष्टः कोऽपि सुरद्रुमस्सरसया गीर्बाणवाग्वीरुधा-
पप्तत्कालमहानिलेन निहतो विद्वत्पतत्र्याश्रयः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कस्याग्रे रुदिमः क्व वा वयमिमे यामो भृशं वञ्चिताः
पश्यामो भुवनञ्च शून्यमखिलं गर्ह्यामहे दुर्विधिम् ॥६॥
सम्राड्जार्जपि पञ्चमस्स जगतां पूज्याय यस्मै भृशम्
हृष्यञ्श्रीशिवदण्डपाणिमखिने प्रादादुपाधिं परम् ।
संमानं वहवो व्यतारिषुरपि प्रीत्याऽन्यपृथ्वीभुजः
प्राचार्योऽभजदेष शङ्करपदं मेध्याग्निना संस्कृतः ॥७॥
महामहोपाध्यायश्रीदण्डपाणिमखीशितुः ।
अन्तेवसन्कृष्णमूर्तिर्निरमाच्चरमां कृतिम् ॥८॥

(पारीन्द्रः=सिंहः सामजः= गजः)

चित्रेयं घटना

डम्बळेंत्युपाख्यः कालिङ्गशर्मा विजयपुरम् ।
गतसप्ताम्बराङ्के मधुरवाण्यां को न काङ्क्षेदिति पद्यानि प्रकटितान्यासन्-विद्यालय-पत्रिकायां तत्पद्यानुरूपचित्रावलोकनेन पुनरिमानि पद्यानि स्फुरतानि कवेरिति ।

यामालोक्य मनोज्ञचित्रवसनामाकृष्टचित्तस्य मे
काव्यस्फूर्तिरभूत्कृतौ परिणतांनां को न काङ्क्षेदिति ।
तामेवात्मनि चित्रितां विदधता पत्रेण विद्वौकसः
चित्रेयं घटना ममाद्य विवृता वृत्तिं विना कारिका ॥१॥
चित्रार्पिता सुपरिकल्पितचित्रवेषा
अर्धावगुण्ठनवती विधियोगतो नु ।
शृङ्गारभङ्गिनयनान्तहृतान्तरङ्गा
व्यङ्ग्यशयां हि कवितां विशदीकरोति ॥२॥
शम्भुर्भूपः स्मरपरवशः कण्ठलग्नस्तरुण्याः
शय्यागारे यवनपतिना शृङ्खलाबद्ध आसीत् ।
एतच्चित्रं स्फटति खलु यच्चित्रितं नो विधात्रा
मैत्री स्त्रीणां प्रथमसुखदाऽप्यन्ततो दुःखदेति ॥३॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नियमावलिः

(१) मधुरवाणीनाम्नीयं संस्कृतपत्रिका प्रत्याङ्गलमासप्रथमसप्ताहे प्रकाश्यते ।

(२) अस्यां प्रायः प्रत्यङ्कमेका लघुकथा, सनातनधर्मविषयकः प्रबन्धः, प्राचीनसाहित्यं चान्ये प्रचलितविषयका विवेचनात्मका लेखाः प्रकटीक्रियेरन् । सनातनधर्मद्रोहिणो लेखा नावकाशं विन्देरन् । प्राहकेनरेषां लेखाः पद्यानि वा न प्रकाश्येरन् ।

(३) पत्रिकाया अस्या अग्रिमप्रदेयं मूल्यं मार्गव्ययसहितं सार्धं रूपकद्वयम् । अंकस्यैकस्याणकचतुष्टयं मूल्यम् । द्वीपांतरवासिनां तु वार्षिकं मूल्यं पंचरूप्यात्मकम् । विना मूल्यमादर्शसंचिका न प्रदीयेत । तदिच्छुभिश्च चतुराणकमूल्यानि शुल्कपत्राणि प्रहीयन्ताम् ।

(४) मधुरवाण्यां श्रेयोभिवृद्धये पञ्चरूपकाणां दातारः सहायकाः दशरूपकदायिनः पोषकाः पञ्चविंशतिरूपकप्रदा अनुग्राहकास्ततोऽप्यधिकं यच्छन्तः संरक्षका इति व्यपदिश्येरन् ।

(५) मधुरवाण्यां नीरसा अमुवाच्याक्षरा एकपार्श्वे एवालिखिता लेखा नावसरमासादयेयुः । लेखपरिवर्तनादिषु निरनुयोज्याधिकाराः खलु संपादकाः । अप्रकाशिता लेखा विना प्रापणव्ययं न प्रतिप्रर्हीयेरन् ।

(६) लेखा विज्ञापनानि समालोचनापेक्षिणो ग्रन्थाः पत्रिकाश्चान्यादि सकलं मधुरवाणी कार्यालय बेळगांव नं. १६९८ इति संकेतेन प्रेष्यम् ।

पत्रं मूल्यधनं वा प्रेषयद्भिः निजसंकेतादिकं देवनागरीलिप्यैव सुस्पष्टं विलेखनीयम् । भूतपूर्वैर्ग्राहकैः पत्रस्य धनस्य वा प्रेषणसमये ग्राहकसंख्यालेखनं नैव विस्मरणीयम् । उत्तरप्रेप्सुभिरवश्यं प्रेषणीयः प्रापणव्ययः ।

प्राप्तिस्थानम्

मधुरवाणी कार्यालय, १६९८ बेळगांव.

Printed at Veer-bharat Printing Press, Belgaum by its proprietor A. P. Chougule and Published by Shri-Inwasacharya Burli at House. No. 1698 Belgaum.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Regd. No. B. 3664.

गजकर्ण, खरूज, नायटे

वगैरे त्वचा रोगांनीं गांजलेल्यासाठ

V.P. 13

गूण न आल्यास पैसे परत

रजिस्टर्ड

गोवा मलम

GOA OINTMENT

पा. किं. ४ आणे

स्टार कंपनी बेळगांव.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.